# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा –** शास्त्री -३ (SEM-5) | **प्रश्नपत्रम् -६** (CC 3.5.10) | **गुणाः –** ७० |
| **विषयः-** नव्यन्यायः | | **ग्रन्थः-** अवयवः |
| **दिनाङ्कः –** १०/१२/२०१८ | | **समयः –** १० तः १ |

### विभागः १

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां ससन्दर्भं लिखत।** **१०**

१ हेतोः पञ्चधर्मान् सोदाहरणं विवृणुत।

२ न्यायजन्यज्ञानस्य परामर्शप्रयोजकत्वं यथाग्रन्थं व्याख्यात।

३ परार्थानुमानं किमिति व्याख्यात।

**प्रश्नः २ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ "उचितानुपूर्वीप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्" इति न्यायलक्षणं परिष्कुरुत।

२ पञ्चावयवनिरूपणे सङ्गतिम् आवश्यकत्वञ्च स्पष्टं प्रतिपादयत।

### विभागः २

**प्रश्नः ३ निम्नलिखितेषु द्वयोः समाधानं ससन्दर्भं लिखत।** **१०**

१ मण्युक्तावयवलक्षणं त्यक्त्वा दीधितिकारेण लक्षणान्तरकथने बीजं प्रतिपादयत।

२ उभयघटकभागद्वयाघटितत्वं व्याख्यात।

३ न्यायान्तर्गतत्वप्रयोजनं व्याख्यात।

**प्रश्नः ४ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ मण्युक्तावयवलक्षणं सदलकृत्यं विवृणुत।

२ दीधित्युक्तम् अवयवद्वितीयलक्षणं सदलकृत्यं प्रतिपादयत।

## विभागः ३

**प्रश्नः ५ निम्नलिखितेषु द्वयोः समाधानं ससन्दर्भं लिखत।** **१०**

१ अनतिरिक्तविषयकत्वस्य मिश्रोक्तं प्रयोजनं सङ्क्षेपेण लिखत।

२ अन्यूनानतिरिक्तविषयकत्वदलस्य सार्थक्यमुपवर्णयतां केचित्काराणां मतं लिखत।

३ निगमने अयमादिपदाननुषङ्गपक्षे अनतिरिक्तपदस्य सार्थक्यं लिखत।

**प्रश्नः ६ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ सूत्रकारीयप्रतिज्ञालक्षणं यथागदाधरि व्याख्यात।

२ मण्युक्तप्रतिज्ञालक्षणं यथादीधिति परिष्कुरुत।

**प्रश्नः ७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु।** **१०**

१ प्रतिज्ञादयः के ?

२ 'प्रतिज्ञा पर्वतपदं न' इति व्यवहारबाधकः नियमः कः?

३ उचितानुपूर्वीस्वरूपं किम् ?

४ पर्वतपदादेः अवयवत्वं कथं वारणीयम् ?

५ पर्यवसितं न्यायलक्षणं किम् ?

६ 'अत्रैव वाक्ये अतिव्याप्तेः' कुत्र?

७ प्रतिज्ञाद्यन्यतमत्वं नाम किम् ?

८ व्युत्क्रमप्रयुक्तप्रतिज्ञादिसमुदायो नाम कः ?

९ सूत्रोक्तं प्रतिज्ञालक्षणं किम्?

१० नव्यन्यायप्रवर्तकः कः ?

११ वीप्सायाः कः अर्थः ?

१२ पञ्चावयवाः कुत्र प्रयुज्यन्ते ?

१३ साध्यनिर्देशो न प्रतिज्ञा, कस्मात् ?

१४ संख्यातिरिक्तसुबर्थस्य अन्वयः कथम् ?

१५ मणिकारोक्तं प्रतिज्ञालक्षणं किम् ?

-----xxxxx-----